णमो समणस्स भगवओ महावीरस्स

श्री सौधर्मबृहत्तपागच्छीय विश्वपूज्य

प्रातःस्मरणीय प्रभु श्रीमद्‌विजय राजेन्द्रसूरीश्वर पट्टप्रभावक चर्चाचक्रवर्ती परमपूज्य
आचार्यदेव श्रीमद् विजय धनचन्द्रसूरीश्वर साहित्यविशारद विद्याभूषण
श्रीमद् विजय भूपेन्द्रसूरीश्वर व्याख्यानवाचस्पति श्रीमद् विजय
यतीन्द्रसूरीश्वर, शान्तमूर्ति कविरत्न श्रीमद् विजय
विद्याचन्द्रसूरीश्वर गुरुभ्यो नमः

सकलागम रहस्यवेदी कलिकाल सर्वज्ञकल्प–विद्वन्मान्य प्रातःस्मरणीय

प्रभु श्रीमद् विजय राजेन्द्रसूरीश्वर विनिर्मित

श्री अभिधान राजेन्द्र कोष

卐 पंचमो भागः 卐

[द्वितीय संस्करण]

:– प्रकाशक :–

शांतमूर्ति आचार्यदेव श्रीमद्‌विजय विद्याचन्द्रसूरीश्वर पट्टालंकार
परमपूज्य तीर्थप्रभावक साहित्यमनीषी आचार्यदेव
श्रीमद्‌विजय जयन्तसेनसूरीश्वरजी महाराज
एवं संयमवयःस्थविर मुनिराजश्री शान्तिविजयजी महाराज
के उपदेश से
अ. भा. श्री सौधर्मबृहत्तपोगच्छीय जैन श्वेताम्बर त्रिस्तुतिक संघ
प्रदत्त द्रव्यसहाय से
श्री अभिधान राजेन्द्र कोष प्रकाशन संस्था, अहमदाबाद.

卐

श्री वीर संवत २५१३ प्रति : १०५० श्री राजेन्द्रसूरि संवत ७८
ईस्वी सन १९८६
मूल्य : संपूर्ण सेट (७ भागका) २५०१
(दो हजार पांचसो एक रुपयें)

प्राप्तिस्थान

श्री अभिधान राजेन्द्रकोष प्रकाशन संस्था
C/o श्री राजेन्द्रसूरि जैन ज्ञान मन्दिर,
रतनपोल, श्री राजेन्द्रसूरि चोक, अहमदाबाद.

मुद्रक : पं. मफतलाल झवेरचंद गांधी
नयन प्रि. प्रेस, का. २–६१
गांधीरोड, ढींकवावाडी, अहमदाबाद–१

अभिधान राजेन्द्रकोषस्य रचना तु सर्वथा अपूर्वेवाऽस्ति
पण्डित शितिकण्ठशास्त्री

श्री अभिधान राजेन्द्रकोष !

शब्दकोशोंकी परंपरा में 'अभिधानराजेन्द्र' यथार्थमें एक विशिष्ट उपलब्धि है ।

श्रीमद् की जीवनसाधनाका यह अत्यंत उदाहरण है । जब इस कोषका पहिला अक्षर लिखा गया तब वे तिरसठ वर्ष के थे ।

सात भागों में तथा दस हजार पांचसो छियासठ पृष्ठों में प्रकाशित यह कोश वस्तुतः एक विश्वकोष के समान है । जिसमें जिनागमों तथा विभिन्न दार्शनिक ग्रन्थों के उद्धरण संकलित कर विस्तृत विवेचन किया गया हैं ।

— वसंतीलाल जैन

अभिधानराजेन्द्र कोष जैसे अतिविशाल ग्रन्थरत्नकी रचना उनके सम्यग् ज्ञानके सर्वांगी समर्पणकी साहजिक निष्पत्ति हैं । अन्यथा असंभव सा यह कार्य उनसे होता ही नहीं । अभिधानराजेन्द्र कोष सामान्य शब्दकोष नहीं हैं । किन्तु शास्त्रवचनोंकी समीचीन अभिव्यक्ति और अर्थघटनका सर्वश्रेष्ठ सहायक माध्यम है ।

— रमेश आर. जवेरी

ग्गहियं तं पायपरियावन्नं तं पाणिपरियावन्नं फासुयं पडिगाहिज्जा, छट्ठा पिंडेसणा ६। अहावरा सत्तमा पिंडेसणा-से भिक्खू वा भिक्खुणी वा० जाव समाणे बहुउज्झियधम्मियं भोयणजायं जाणिज्जा, जं चऽन्ने बहवे दुपयचउप्पयसमणमाहणअतिथिकिवणवणीमगा णावकंखंति, तहप्पगारं उज्झियधम्मियं भोयणजायं सयं जाणेज्जा, परो वा से देज्जा० जाव फासुयं पडिगाहेज्जा, सत्तमा पिंडेसणा, इच्चेयाओ सत्त पिंडेसणाओ ७।

अथशब्दोऽधिकारान्तरे किमधिकुरुते सप्त पिण्डैषणाः पानैषणाश्चेति। अथान्तरं भिक्षुर्जानीयात्-काः सप्त पिण्डैषणाः पानैषणाश्च । ताश्चेमास्तद्यथा-" असंसट्ठा १, संसट्ठा २, उद्धडा ३ अप्पलेवा४, उग्गहिया ५,पग्गहिया ६ उज्झितधम्मा ७" इति। अत्र च द्वये साधवो गच्छान्तर्गता गच्छनिर्गताश्च। तत्र गच्छान्तर्गतानां सप्तानामपि ग्रहणमनुज्ञातं, गच्छनिर्गतानां पुनराद्ययोर्द्वयोरग्रहः पञ्चस्वभिग्रह इति । तत्राऽऽद्यां तावद्दर्शयति-तत्र तासु मध्ये खल्वित्यलङ्कारे इमा प्रथमा पिण्डैषणा । तद्यथा-असंसृष्टो हस्तः, असंसृष्टं च मात्रं, द्रव्यं पुनः सावशेषं वा स्यान्निरवशेषं वा, तत्र निरवशेषे पश्चात्कर्मदोषस्तथाऽपि गच्छस्य बालाऽऽद्याकुलत्वात्तन्निषेधो नास्त्यत एव सूत्रे तच्चिन्ता न कृता। शेषं सुगमम् १ । तथा अपरा द्वितीया पिण्डैषणा। तद्यथा-संसृष्टो हस्तः, संसृष्टं मात्रकमित्यादि सुगमम् २। अथापरा तृतीया पिण्डैषणा । तद्यथा-इह खलु प्रज्ञापकापेक्षया प्राच्यां दिक्षु सन्ति केचित् श्रद्धालवः । ते चामी गृहपत्यादयः कर्म्मकरीपर्यन्तास्तेषां च गृहेष्वन्यतरेषु नानाप्रकारेषु भाजनेषु पूर्वमुत्क्षिप्तमशनाऽऽदि स्यात्भाजनानि च स्थालाऽऽदीनि सुबोध्यानि, नवरं सरगमिति शरिकाभिः कृतं सूर्पाऽऽदि.परगं वंशनिष्पन्नं छब्बकाऽऽदि वरगं मण्यादिमहार्घमूल्यं, शेषं सुगमं,यावत्परिगृह्णीयादिति। अत्र च संसृष्टासंसृष्टसावशेषद्रव्यैरष्टौ भङ्गाः,तेषु चाष्टमो भङ्गः संसृष्टो हस्तः, संसृष्टं मात्रं,सावशेषं द्रव्यमित्येष गच्छनिर्गतानामपि कल्पते शेषास्तु भङ्गा गच्छान्तर्गतानां सूत्रार्थहान्यादिकं कारणमाश्रित्य कल्पन्ते इति ३। अपरा चतुर्थी पिण्डैषणा-अल्पलेपा नाम सा यत्पुनरेवमल्पलेपं जानीयात्तद्यथा पृथुकमिति भुग्नशाल्याद्यपगततुषं यावत्तन्दुलप्रलम्बमिति भुग्नशाल्यादितन्दुलामिति अत्र च पृथुकाऽऽदिके गृहीतेऽप्यल्पं पश्चात्कर्म्माऽऽदि, तथा अल्पं पर्यायजातमल्पं तुषाऽऽदि त्यजनीयमित्येवंप्रकारमल्पलेपमन्यदपि वल्लचणकाऽऽदि यावत्परिगृह्णीयादिति ४। अथापरा पञ्चमी पिण्डैषणा-अवगृहीता नाम। तद्यथा-स भिक्षुर्यावदुपहृतमेव भोक्तुकामस्य भाजनस्थितमेव भोजनजातं ढौकितं जानीयात्तत्पुनर्भाजनं दर्शयति । तद्यथा-शरावं प्रतीतं, डिण्डिमं कांस्यभाजनं, कोशकं प्रतीतं, तेन च दात्रा कदाचित्पूर्वमेवोदकेन हस्तो मात्रकं वा धौतं स्यात्तथा च निषिद्धं ग्रहणम्।अथ पुनरेवं जानीयाद्बहुपर्यापन्नः परिणतः पाण्यादिषूदकलेपस्तत एवं ज्ञात्वा यावद् गृह्णीयादिति ५। अथापरा षष्ठी पिण्डैषणा-प्रगृहीता नाम स्वार्थं परार्थं वा पिठरकाऽऽदेरुद्धृत्य चट्टुकाऽऽदिनोत्क्षिप्ता परेण च न गृहीता प्रव्रजिताय वा दायिता,सा प्रकर्षेण गृहीता प्रगृहीता तां तथाभूतां प्राभृतिकां 'पात्रपर्यापन्नां वा'पात्रस्थितां पाणिपर्यापन्नां वा हस्तस्थितां वा यावत्प्रतिगृह्णीयादिति ६। अथापरा सप्तमी पिण्डैषणा-उज्झितधर्म्मिका नाम,सा च सुगमा ७। आसु च सप्तस्वपि पिण्डैषणासु संसृष्टाऽऽद्यष्टभङ्गका भणनीयाः,नवरं चतुर्थ्यां नानात्वमिति तस्या अलेपत्वात्संसृष्टाऽऽद्यभाव इति। आचा०२ श्रु०१ चू० १ अ० ११ उ० । आचाराङ्गद्वितीयश्रुतस्कन्धस्याऽदित आरभ्य सप्ताध्यायीरूपायाः प्रथमचूडायाः प्रथम अध्ययने, स० १ अङ्ग० । आ० चू० । प्रश्न० । ध० ।

पिंडेसिका-पिण्डैषिका-पुं० । पिण्डं भोजनमिच्छन्त्यन्वेषयन्ति वा ये ते पिण्डैषिकाः । पिण्डान्वेषकेषु,भ०१ श०३३ उ०।

पिंडोलग-पिण्डावलग-पुं०। 'पिडि ' संघाते, पिण्ड्यते तत्तद्गृहेभ्य आदायात्यते इति पिण्डः. तमवलगते सेवते पिण्डावलगकः । स्वयमाहाराभावतः परदत्तोपजीविनि, उत्त० ५ अ०। सूत्र० । "पिंडोलए व दुस्सीले, णरगाओ न मुच्चइ।" उत्त० ५ अ० । आचा० । सूत्र० ।

पिंसुली-देशी-मुखमारुतपूरिततृणवाद्यविशेषे, दे० ना० ६ वर्ग ४७ गाथा ।

पिक्क-पक्व-त्रि० ।" सर्वत्र ल-व-रामचन्द्रे " ॥८।२।७९॥ इति वलोपः। प्रा०२ पाद। "पक्वाङ्गारललाटे वा"॥८।१।४७॥ इत्यकारस्येकारः । प्रा० १ पाद। " पक्कं पिक्कं परिणयं ।" पाइ० ना० १४३ गाथा ।

पिक्कमांसी-पक्वमांसी-स्त्री० । संस्कृते गन्धद्रव्यविशेषे, प्रश्न० ५ संव० द्वार ।

पिक्खण-प्रेक्षण-न० । प्रेक्षणं चक्षुषा निरीक्षणम् । प्रत्युपेक्षणे, ओघ० ।

पिचुमंद-पिचुमन्द-पुं० । निम्बे, नि० चू० १ उ० ।

पिच्च-नीर-न० । उदके, दश० ७ अ० ।

पिच्चा-प्रेत्य-अव्य० । परलोके, "पिच्चा न ते संति"। सूत्र० १ श्रु० १ अ० १ उ० ।

पीत्वा-स्त्री० । पानं कृत्वेत्यर्थे, कल्प० ३ अधि० ६ क्षण ।

पिच्चिय-पिच्चित-न०। कुट्टितत्वङ्मये लेखनोपकरणे, स्था०५ ठा० ४ उ० ।

पिच्छ-पिच्छ-पुं०। न०। पत्रे, ज्ञा०१ श्रु०१ अ०। पक्षे, ज्ञा०१ श्रु० ३ अ०। पक्षावयवविशेषे,उपा०१ अ० प्रश्न० । प्रज्ञा०। मयूराङ्गरुहे, जी० १७ अधि० । " पिच्छाइं पेहुणाइं" पाइ०ना० १२६ गाथा । धूते, " उअ पिच्छ। " पाइ० ना० २२३ गाथा ।

पिच्छणिज्ज-प्रेक्षणीय-न०। द्रष्टुं योग्ये, कल्प०१ अधि०२ क्षण ।

पिच्छाघर-प्रेक्षागृह-न०। वास्तुविद्याप्रसिद्धे गृहे,चं० प्र०४पाहु०।

पिच्छाभूमि-प्रेक्षाभूमि-स्त्री० । रङ्गमण्डपे, " रंगो पिच्छाभूमी ।" पाइ० नां० २७२ गाथा ।

पिच्छि-पिच्छिन्-पुं० । मयूराऽऽदिपिच्छवाहिनि, भ०१ श० ३३ उ० । औ० । जं० ।

पिच्छिज्जमाण-प्रेक्ष्यमाण-त्रि० । विलोक्यमाने, कल्प० १ अधि० ५ क्षण । प्रश्न० ।

पिच्छिली-देशी-लज्जायाम् , दे० ना० ६ वर्ग ४७ गाथा।

पिच्छी-पृथ्वी -स्त्री० । " इत्कृपाऽऽदौ " ॥८ । १ । १२८॥ इति ऋत इत्वम् । औ० । जं० । " त्व-थ्व-द्व-ध्वां च-छ-ज-

ज्ञः क्वचित् "॥ ८।२।१५॥ इति ज्ञः स्थाने ज्जाऽऽदेशः। प्रा० २ पाद।

पिज्ज-पा-धा० पाने, " पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः " ॥ ८।४।१०॥ इति पिबतेः 'पिज्ज' आदेशः । पिज्जइ । पिबति । प्रा० ४ पाद।

पेय-न०। पीयमाने नद्यादौ, बृ० २ उ०।

प्रेमन्-न०। अभिष्वङ्गे, सूत्र० १ श्रु० १६ अ०।

पिज्जणिस्सिय-प्रेमनिःसृत-न०। अतिरक्तानां दासोऽहं तवत्यादिरूपे मिथ्यावचने, स्था० १० ठा०।

पिज्जदोसमिच्छादंसणविजय-प्रेमद्वेषमिथ्यादर्शनविजय-पुं०। प्रेम राग इत्यर्थः, स च द्वेषश्चाप्रीतिरूपो मिथ्यादर्शनं, सांशयिकाऽऽदिप्रेमद्वेषमिथ्यादर्शनानि, तद्विजयः। रागद्वेषमिथ्यात्ववर्जये, उत्त०।

पिज्जदोसमिच्छादंसणविजएणं भंते! जीवे किं जणयइ?। गोयमा! पिज्जदोसमिच्छादंसणविजएणं नाणदंसणचरित्ताराहणयाए अब्भुट्ठेति, अट्ठविहस्स कम्मगंठिविमोयणयाए तप्पढमट्ठाएणं जहाणुपुव्वीए अट्ठावीसइविहं मोहणिज्जं कम्मं उग्घाएइ, पंचविहं नाणावरणिज्जं नवविहं दंसणावरणिज्जं पंचविहं अंतराय एए तिन्नि वि कम्मंसे जुगवं खवेइ, तओ पच्छा अणंतं अणुत्तरं कसिणं पडिपुन्नं निरावरणं वितिमिरं विसुद्धं लोगालोगप्पभावगं केवलवरनाणदंसणं समुप्पाडेइ ०जाव सजोगी भवइ ताव इरियावहियं कम्मं निबंधइ, सुहफरिसं दुसमयट्ठिइयं तं पढमसमए बद्धं विइए समए वेइयं तइए समए निज्जिन्नं तं बद्धं पुट्ठं उदीरियं वेइयं निज्जिन्नं सेयाले य अकम्मे यावि भवइ।७१।

हे भदन्त! स्वामिन्! प्रेय्यद्वेषमिथ्यादर्शनविजयेन जीवः किं फलं जनयति?। तत्र प्रेय्यशब्देन प्रेम रागः, द्वेषः प्रसिद्धो, मिथ्यादर्शनं संशयाऽऽदिभिर्विपरीतमतित्वं, प्रेय्यं च द्वेषश्च मिथ्यादर्शनं च प्रेय्यद्वेषमिथ्यादर्शनानि, तेषां विजयः प्रेय्यद्वेषमिथ्यादर्शनविजयस्तेन जीवः किं फलमुत्पादयति?। तदा गुरुराह-हे शिष्य! रागद्वेषमिथ्यादर्शनविजयेन जीवो ज्ञानदर्शनचारित्राणामाराधनायै अभ्युत्तिष्ठते, सावधानो भवति; अभ्युत्थाय च अष्टविधकर्मणां ग्रन्थिं घातिकर्मणां कठिनजालं विमोचनार्थं क्षपयितुम् अभ्युत्तिष्ठते सावधानो भवति। अथ कर्मग्रन्थिविमोचने अनुक्रममाह—तत् प्रथमतया यथानुक्रममष्टाविंशतिविधं मोहनीयं कर्म्म उद्घातयति, क्षपकश्रेणिमारूढः सन् क्षपयति, षोडश कषायाः, नव नोकषायाः, मोहनीयत्रयम्। एवमष्टाविंशतिविधं मोहनीयकर्म विनाशयति, ततश्चरमसमये यत् क्षपयति तत् क्रममाह—मतिश्रुतावधिमनःपर्यायाऽऽवरणरूपं कर्म पञ्चप्रकारविधं दर्शनाऽऽवरणीयं कर्म्म चक्षुर्दर्शनाऽचक्षुर्दर्शनावधिदर्शनकेवलदर्शनाऽऽवरणं निद्रापञ्चकम्, एवं नवविधं दर्शनाऽऽवरणीयं कर्म्म, ततः पश्चात्पञ्चविधम्-अन्तरायम्, एतानि त्रीणि (कम्मंसे इति) सत्कर्माणि विद्यमानानि त्रीणि कर्माणि युगपत् क्षपयति; क्षपकश्रेण्यारूढः सन् समकालं क्षयं नयतीत्यर्थः। ततः पश्चादनन्तरं तेषां कर्मणां क्षयीकरणादनन्तरम् अनुत्तरं सर्वेभ्यः प्रधानमनन्तमन्तार्थग्राहकं कृत्स्नं समस्तवस्तुपर्यायग्राहकं प्रतिपूर्णं सकलैः स्वपरपर्यायैः सहितं निरावरणं समस्तावरणरहितं, वितिमिरम् अज्ञानांशरहितं, विशुद्धं सर्वदोषरहितं, लोकालोकप्रभावकं लोकालोकयोः प्रकाशकारकम्, एतादृशं केवलवरज्ञानदर्शनं समुत्पादयति, यावत् सयोगी भवति, मनोवाक्कायानां योगो व्यापारस्तेन सह वर्तते इति सयोगी भवति। त्रयोदशगुणस्थाने यावत्तिष्ठति तावत् ईर्यापथिकं कर्म बध्नाति, ईरणं ईर्या गतिस्तस्याः पन्थाः ईर्यापथः, ईर्यापथे भवमीर्यापथिकं, पथो ग्रहणं हि उपलक्षणं तस्य तिष्ठतोऽपि सयोगस्य ईर्यायाः सम्भवात् सयोगतायां केवलिनोऽपि सूक्ष्मसञ्चाराः सन्ति, तत् ईर्यापथिकं कर्म कीदृशं भवति?, तदुच्यते-सुखयतीति सुखः सुखकारी स्पर्श आत्मप्रदेशैः सह संश्लेषो यस्य तत् सुखस्पर्शं, द्विसमयस्थितिकं द्वौ समयौ स्थितिर्यस्याः सा द्विसमया, द्विसमया स्थितिरस्येति द्विसमयस्थितिकम्। तत् द्विसमयस्थितिकस्वरूपमाह-प्रथमसमये बद्धं स्वस्य स्पर्शनाय अधीनं कृतमधीनकरणात् स्पृष्टमपि द्वितीये समये तद्बद्धं स्पृष्टं वेदितं कायेन अनुभूतं तृतीयसमये निर्जीर्णं परिशाटितं, निष्कषायस्य उत्तरकालस्थितेरभावो वर्तते, उत्तरकाले सकषायस्य बन्धो भवति, परं केवलिनो न भवति। तदेव पुनः सूत्रकारः भ्रान्तिनिवारणार्थमाह-तत् ईर्यापथिकं कर्म केवलिनो बद्धम् आत्मप्रदेशैः सह श्लिष्टं व्योम्ना पटवत् तथा स्पृष्टमसृणमपि कुड्यापतितशुष्कचूर्णवत् इति विशेषणद्वयेन केवलिनो हि निधत्तनिकाचितावस्थयोरभावः, पुनरुदीरितम् उदयप्राप्तं सत् वेदितम् अनुभूतं, केवलिनो हि उदीरणा न भवति, ततो निर्जीर्णं क्षयमुपगतम् ततः (सेयाले इति) एष्यत्काले आगामिनि काले अकर्मा चापि भवति, कर्मरहितो भवति इत्यर्थः। उत्त० ११ अ०।

पिज्जबंधण-प्रेमबन्धन-न०। स्नेहबन्धने, कल्प० १ अधि० ६ क्षण।

पिट्ट-पिट्ट-न०। उदरे, पञ्चा० ३ विव०।

पिट्टण-पिट्टन-न०। वस्त्राऽऽदेरिव मुद्गराऽऽदिना हनने, औ०। " धनहीनरण्डारमर्मभिरिव पुनः पुनः प्रक्षेपपुरःसरमुद्गरैरपिट्टनेन कुट्टने, " पि०। एतच्च वस्त्रं धावयता साधुना न कर्तव्यम्। ओघ०। सूत्र०। प्रश्न०।

पिट्टावणया-पिट्टनता-स्त्री०। पिट्टनप्रापिकायां परितापनायाम्, भ० ३ श० ३ उ०।

पिट्टिय-पिट्टित-त्रि०। कदर्थिते, आ० म० १ अ०। दर्श०।

पिट्ठ-पिष्ट-न०। मुद्गाऽऽदिचूर्णे, बृ०१ उ०२ प्रक०। उण्डेरकाऽऽदिशकुप्रभृतिके, बृ० १ उ० २ प्रक०। ज्ञा०। ध०। नि०चू०। आ० म०। तन्दुललोदे, दश० ५ अ० १ उ०। लोदे, रा०। आच्छुटिततन्दुलचूर्णे, आचा० २ श्रु०१ चू० १ अ० ६ उ०। पिष्टस्य तु मिश्रताऽऽयेवमुक्तं पूर्वसूरिभिः-"पणदिणमीसो लुट्ठो, अचालिओ सावणे अ भद्दवए। चउआसोए कत्तिअ-मग्गसिरपोसेसु तिन्नि दिणा॥ १॥" ध० २ अधि०।